**22R/19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जानेवारी – २०२३**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय (22R413/19R414)**

| दिनांक : ०५/०१/२०२३ | गुण : ६० | वेळ : स. १०.०० ते दु. १२.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. द्वौ गद्यांशौ माध्यमभाषया अनुवदत। (१२)**

१) अथ रक्ताक्षवचनमनादृत्य तै: स्ववंशविनाशाय स स्वदुर्गमुपनीत:। नीयमनश्चान्तर्लीनमवहस्य स्थिरजीवी व्यचिन्तयत्–'हन्यतामिति येनोक्तं स्वामिनो हितवादिना। स एवैकोऽत्र सर्वेषां नीतिशास्त्रार्थतत्त्ववित्।। तद्यदि तस्य वचनमकरिष्यन्नेते ततो न स्वल्पोऽप्यनर्थोऽभविष्यदेतेषाम्।अथ दुर्गद्वारं प्राप्यारिमर्दनोऽब्रवीत' भो भो! हितैषिणोऽस्य स्थिरजीविनो यथा समीहितं स्थानं प्रयच्छत।' तच्च श्रुत्वा स्थिरजीवी व्यचिन्तयत्– 'मया तावदेषां वधोपायश्चिन्तनीयः। स मया मध्यस्थेन न साध्यते, यतो मदीयमिङ्गितादिकं विचारयन्तस्तेऽपि सावधाना भविष्यन्ति।

२) तद्यथानुश्रूयते अस्ति दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तस्य समीपस्थोऽनेकशाखासनाथोऽतिसघनतरपत्रच्छन्नो न्यग्रोधपादपोऽस्ति। तत्र च मेघवर्णो नाम वायसराजोऽनेककाकपरिवार: प्रतिवसति स्म। स तत्र विहितदुर्गरचन: सपरिजन: कालं नयति स्म। तथाऽन्योऽरिमर्दनो नामोलूकराजोऽसङ्ख्योलूक-परिवारो गिरिगुहादुर्गाश्रय: प्रतिवसति स्म। स च रात्रावभेत्य सदैव तस्य न्यग्रोधस्य समन्तात् परिभ्रमति। अथोलूकराज: पूर्वविरोधवशाद्यं कश्चिद्वायसं समासादयति तं व्यापाद्य गच्छति।

३) स्थिरजीव्याह – देव! अद्याकिञ्चित्करेणैतदवस्थेन किं मयोपसङ्गृहीतेन? यत्कारणमिच्छामि दीप्तं वह्निमनुप्रवेष्टुम्। तदर्हसि मामग्निप्रदानेन समुद्धर्तुम्। अथ रक्ताक्षस्तस्यान्तर्गतभावं ज्ञात्वाऽब्रवीत् – किमर्थमग्निपतनमिच्छसि? सोऽब्रवीत् अहं तावद्युष्मदर्थे इमामापदं मेघवर्णेन प्रापित:, तदिच्छामि तेषां वैरयातनार्थमुलूकत्वम् इति। तच्च श्रुत्वा राजनीतिकुशलो रक्ताक्ष: प्राह – भद्र, कुटिलस्त्वं कृतक-वचनचतुरश्च। तत्त्वमुलूकयोनिगतोऽपि स्वकीयामेव वायसयोनिं बहु मन्यसे श्रूयते चैतदाख्यानकम्। सूर्यं भर्तारमुत्सज्य पर्जन्यं मारुतं गिरिम्। स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा।।

**प्र.२. केषाञ्चित् अष्टानां रूपपरिचयं कारयत्। (०८)**

१.श्रुत्वा २.मया ३.प्ररोहति ४.कृकालिकया ५.रोमाणि६.सर्वे ७.नार्या:८.तव ९.हेतुना

**प्र.३. कानपि चतुरः सन्धीन् विघटयत। (०४)**

१.तवावासम् २.द्वेषमुत्सृज्य ३.पूजयैनम् ४.फलान्येतानि ५.पुनश्च

**प्र.४. कानपि चतुरः सूचनानुसारं परिवर्तयत। (०४)**

१) अहं स्वजातिविहितं गृहिणीधर्ममनुतिष्ठामि। (अहं स्थाने सा इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
२) स्थिरजीवी व्यचिन्तयत्। (वाक्यं लट्लकारे परिवर्तयत।)
३) ते उलूकपतिसेवका: प्रकाममाहारं स्थिरजीविने प्रयच्छन्ति। (वाक्यं एकवचने परिवर्तयत।)
४) मां मूषिकां कृत्वा अस्मै प्रयच्छ। (भवान् इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
५) एषा क्षेत्रदेवता न कदापि मया पूजिता। (वाच्यपरिवर्तनं कुरुत।)

**प्र.५. द्वे वाक्ये ससन्दर्भं स्पष्टीकुरुत। (२०)**

१) बहवो न विरोद्धव्या दुर्जयो हि महाजन:।
२) व्यपदेशेन महतां सिद्धिः सञ्जायते परा।
३) बिलस्य वाणी न कदापि मे श्रुता।

**प्र.६.** कामपि कथां स्वशब्दै संस्कृतेन लिखत। **(१२)**

----------